# Yajnavalkyakritam Surya Stotram 24

# યાજ્ઞવલ્ક્યકૃતં સૂર્યસ્તોત્રમ્ ૨૪

## Document Information

Text title : Yajnavalkyakritam Surya Stotram 24

File name : yAjnavalkyakRRitaMsUryastotram24.itx

Category : navagraha, bhAgavatapurANa, stotra

Location : doc_z_misc_navagraha

Proofread by : PSA Easwaran

Description/comments : bhAgavatapurANa | adhyAya 12/6/67-72||

Latest update : October 18, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 18, 2025

*sanskritdocuments.org*

# Yajnavalkyakritam Surya Stotram 24

# યાજ્ઞવલ્ક્યકૃતં સૂર્યસ્તોત્રમ્ ૨૪

યાજ્ઞવલ્ક્ય ઉવાચ ।
ૐ નમો ભગવતે આદિત્યાયાખિલજગતા-
માત્મસ્વરૂપેણ કાલસ્વરૂપેણ ચતુર્વિધ-
ભૂતનિકાયાનાં બ્રહ્માદિસ્તમ્બપર્યન્તાના-
મન્તર્હૃદયેષુ બહિરપિ ચાકાશ ઇવોપાધિના-
વ્યવધીયમાનો ભવાનેક એવ ક્ષણલવ-
નિમેષાવયવોપચિતસંવત્સરગણેનાપામાદાન-
વિસર્ગાભ્યામિમાં લોકયાત્રામનુવહતિ ॥ ૬૭॥

યદુ હ વાવ વિબુધર્ષભ સવિતરદસ્તપ-
ત્યનુસવનમહરહરામ્નાયવિધિનોપ-
તિષ્ઠમાનાનામખિલદુરિતવૃજિન-
બીજાવભર્જન ભગવતઃ સમભિધીમહિ
તપનમણ્ડલમ્ ॥ ૬૮॥

ય ઇહ વાવ સ્થિરચરનિકરાણાં
નિજનિકેતનાનાં મન ઇન્દ્રિયાસુ-
ગણાનનાત્મનઃ સ્વયમાત્માન્તર્યામી
પ્રચોદયતિ ॥ ૬૯॥

ય એવેમં લોકમતિકરાલવદના-
ન્ધકારસંજ્ઞાજગરગ્રહગિલિતં
મૃતકમિવ વિચેતનમવલોક્યા-
નુકમ્પયા પરમકારુણિક
ઈક્ષયૈવોત્થાપ્યાહરહરનુસવનં
શ્રેયસિ સ્વધર્માખ્યાત્માવસ્થાને
પ્રવર્તયતિ ॥ ૭૦॥

અવનિપતિરિવાસાધૂનાં ભય-
મુદીરયન્નટતિ પરિત આશા-
પાલૈસ્તત્ર તત્ર કમલકોશા-
ઞ્જલિભિરુપહૃતાર્હણઃ ॥ ૭૧॥

અથ હ ભગવંસ્તવ ચરણનલિનયુગલં
ત્રિભુવનગુરુભિરભિવન્દિતમહમયાત-
યામયજુષ્કામ ઉપસરામીતિ ॥ ૭૨॥

ઇતિ શ્રીમદ્ભાગવતમહાપુરાણે દ્વાદશસ્કન્ધે ષષ્ઠાધ્યાયાન્તર્ગતં
યાજ્ઞવલ્ક્યકૃતં સૂર્યસ્તોત્રં સમાપ્તમ્ ।

ભાગવતપુરાણ । અધ્યાય ૧૨/૬/૬૭-૭૨॥

bhAgavatapurANa . adhyAya 12/6/67-72..

Proofread by PSA Easwaran

---

*Yajnavalkyakritam Surya Stotram 24*

pdf was typeset on October 18, 2025

Please send corrections to *sanskrit@cheerful.com*